श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीशङ्कराचार्य विरचितम्

# ॥ श्री हनुमद्भुजङ्गप्रयातस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री हनुमद्भुजङ्गप्रयातस्तोत्रम् ॥

प्रपन्नानुरागं प्रभाकाञ्चनाभं
जगद्भीतिशौर्यं तुषाराद्रिधैर्यम्।
तृणीभूतहेतिं रणोद्यद्विभूतिं
भजे वायुपुत्रं पवित्राप्तमित्रम्॥ 1 ॥

भजे पावनं भावनानित्यवासं
भजे बालभानु प्रभाचारुभासम्।
भजे चन्द्रिकाकुन्द मन्दारहासं
भजे सन्ततं रामभूपाल दासम्॥ 2 ॥

भजे लक्ष्मणप्राणरक्षातिदक्षं
भजे तोषितानेक गीर्वाणपक्षम्।
भजे घोरसङ्ग्राम सीमाहताक्षं
भजे रामनामाति सम्प्राप्तरक्षम्॥ 3 ॥

कृताभीलनादं क्षितिक्षिप्तपादं
घनक्रान्त भृङ्गं कटिस्थोरु जङ्घम्।
वियद्व्याप्तकेशं भुजाश्लेषिताश्मं
जयश्री समेतं भजे रामदूतम्॥ 4 ॥

चलद्वालघातं भ्रमच्चक्रवालं
कठोराट्टहासं प्रभिन्नाब्जजाण्डम्।

महासिंहनादा द्विशीर्णत्रिलोकं
भजे चाञ्जनेयं प्रभुं वज्रकायम् ॥ 5 ॥

रणे भीषणे मेघनादे सनादे
सरोषे समारोपिते मित्रमुख्ये।
खगानां घनानां सुराणां च मार्गे
नटन्तं वहन्तं हनूमन्त मीडे ॥ 6 ॥

कनद्रत्न जम्भारि दम्भोलिधारं
कनद्दन्त निर्धूतकालोग्र दन्तम्।
पदाघातभीताब्धि भूतादिवासं
रणक्षोणिदक्षं भजे पिङ्गलाक्षम् ॥ 7 ॥

महागर्भपीडां महोत्पातपीडां
महारोगपीडां महातीव्रपीडाम्।
हरत्याशु ते पादपद्मानुरक्तो
नमस्ते कपिश्रेष्ठ रामप्रियो यः ॥ 8 ॥

सुधासिन्धुमुल्लङ्घ्य नाथोग्र दीप्तः
सुधाचौषदीस्ताः प्रगुप्तप्रभावम्।
क्षणद्रोणशैलस्य सारेण सेतुं
विना भूःस्वयं कस्समर्थः कपीन्द्रः ॥ 9 ॥

निरातङ्कमाविश्य लङ्कां विशङ्को
भवानेन सीतातिशोकापहारी।
समुद्रान्तरङ्गादि रौद्रं विनिद्रं
विलङ्घ्योरु जङ्घस्तुताऽमर्त्यसङ्घः ॥ 10 ॥

रमानाथ रामः क्षमानाथ रामः
अशोकेन शोकं विहाय प्रहर्षम्।

वनान्तर्घनं जीवनं दानवानां
    विपाट्य प्रहर्षात् हनूमत् त्वमेव ॥ **11** ॥

जराभारतो भूरिपीडां शरीरे
    निराधारणारूढ गाढ प्रतापे।
भवत्पादभक्तिं भवद्भक्तिरक्तिं
    कुरु श्रीहनूमत्प्रभो मे दयालो ॥ **12** ॥

महायोगिनो ब्रह्मरुद्रादयो वा
    न जानन्ति तत्त्वं निजं राघवस्य।
कथं ज्ञायते मादृशे नित्यमेव
    प्रसीद प्रभो वानरेन्द्रो नमस्ते ॥ **13** ॥

नमस्ते महासत्त्ववाहाय तुभ्यं
    नमस्ते महावज्र देहाय तुभ्यम्।
नमस्ते परीभूत सूर्याय तुभ्यं
    नमस्ते कृतामर्त्य कार्याय तुभ्यम् ॥ **14** ॥

नमस्ते सदा ब्रह्मचर्याय तुभ्यं
    नमस्ते सदा वायुपुत्राय तुभ्यम्।
नमस्ते सदा पिङ्गलाक्षाय तुभ्यं
    नमस्ते सदा रामभक्ताय तुभ्यम् ॥ **15** ॥

हनूमद्भुजङ्गप्रयातं प्रभाते
    प्रदोषेऽपि वा चार्धरात्रेऽप्यमर्त्यः।
पठन्नश्नतोऽपि प्रमुक्ताघजालं
    सदा सर्वदा रामभक्तिं प्रयाति ॥ **16** ॥

॥ इति श्री हनुमद्भुजङ्गप्रयातस्तोत्रं समाप्तम् ॥